॥ ब्रह्मसूत्रम् ॥

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

जन्माद्यस्य यतः ॥ २ ॥

शास्त्रयोनित्वात् ॥ ३ ॥

तत्तु समन्वयात् ॥ ४ ॥

ईक्षतेर्नाशब्दम् ॥ ५ ॥

गौणश्चेन्नात्मशब्दात् ॥ ६ ॥

तन्निष्ठस्य मोक्षोपदेशात् ॥ ७ ॥

हेयत्वावचनाच्च ॥ ८ ॥

स्वाप्ययात् ॥ ९ ॥

गतिसामान्यात् ॥ १० ॥

श्रुतत्वाच्च ॥ ११ ॥

आनन्दमयोऽभ्यासात् ॥ १२ ॥

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १३ ॥

तद्धेतुव्यपदेशाच्च ॥ १४ ॥

मान्त्रवर्णिकमेव च गीयते ॥ १५ ॥

नेतरोऽनुपपत्तेः ॥ १६ ॥

भेदव्यपदेशाच्च ॥ १७ ॥

कामाच्च नानुमानापेक्षा ॥ १८ ॥

अस्मिन्नस्य च तद्योगं शास्ति ॥ १९ ॥

अन्तस्तद्धर्मोपदेशात् ॥ २० ॥

भेदव्यपदेशाच्चान्यः ॥ २१ ॥

आकाशस्तल्लिङ्गात् ॥ २२ ॥

अत एव प्राणः ॥ २३ ॥

ज्योतिश्चरणाभिधानात् ॥ २४ ॥

छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथाहि दर्शनम् ॥ २५ ॥

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २६ ॥

उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधात् ॥ २७ ॥

प्राणस्तथानुगमात् ॥ २८ ॥

न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमाह्यस्मिन् ॥

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ ३० ॥

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३१ ॥

द्वितीयः पादः ॥

सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥

विवक्षितगुणोपपत्तेश्च ॥ २ ॥

अनुपपत्तेस्तु न शारीरः ॥ ३ ॥

कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥

शब्दविशेषात् ॥ ५ ॥

स्मृतेश्च ॥ ६ ॥

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

संभोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८ ॥

अत्ता चराचरग्रहणात् ॥ ९ ॥

प्रकरणाच्च ॥ १० ॥

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥

विशेषणाच्च ॥ १२ ॥

अन्तर उपपत्तेः ॥ १३ ॥

स्थानादिव्यपदेशाच्च ॥ १४ ॥

सुखविशिष्टाभिधानादेव च ॥ १५ ॥

श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १६ ॥

अनवस्थितेरसंभवाच्च नेतरः ॥ १७ ॥

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥

न च स्मार्तमतद्धर्माभिलापात् ॥ १९ ॥

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ २० ॥

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥

विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ २२ ॥

रूपोपन्यासाच्च ॥ २३ ॥

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥

स्मर्यमाणमनुमानं स्यादिति ॥ २५ ॥

शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेन्न तथादृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते ॥ २६ ॥

अत एव न देवता भूतं च ॥ २७ ॥

साक्षादप्यविरोधं जैमिनिः ॥ २८ ॥

अभिव्यक्तेरित्याश्मरथ्यः ॥ २९ ॥

अनुस्मृतेर्बादरिः ॥ ३० ॥

संपत्तेरिति जैमिनिस्तथाहि दर्शयति ॥ ३१ ॥

आमनन्ति चैनमस्मिन् ॥ ३२ ॥

तृतीयः पादः ॥

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥

मुक्तोपसृप्यव्यपदेशात् ॥ २ ॥

नानुमानमतच्छब्दात् ॥ ३ ॥

प्राणभृच्च ॥ ४ ॥

भेदव्यपदेशात् ॥ ५ ॥

प्रकरणात् ॥ ६ ॥

स्थित्यदनाभ्यां च ॥ ७ ॥

भूमा संप्रसादादध्युपदेशात् ॥ ८ ॥

धर्मोपपत्तेश्च ॥ ९ ॥

अक्षरमम्बरान्तधृतेः ॥ १० ॥

सा च प्रशासनात् ॥ ११ ॥

अन्यभावव्यावृत्तेश्च ॥ १२ ॥

ईक्षतिकर्मव्यपदेशात्सः ॥ १३ ॥

दहर उत्तरेभ्यः ॥ १४ ॥

गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च ॥ १५ ॥

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ १६ ॥

प्रसिद्धेश्च ॥ १७ ॥

इतरपरामर्शात्स इति चेन्नासंभवात् ॥ १८ ॥

उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ १९ ॥

अन्यार्थश्च परामर्शः ॥ २० ॥

अल्पश्रुतेरिति चेत्तदुक्तम् ॥ २१ ॥

अनुकृतेस्तस्य च ॥ २२ ॥

अपि च स्मर्यते ॥ २३ ॥

शब्दादेव प्रमितः ॥ २४ ॥

हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ २५ ॥

तदुपर्यपि बादरायणः संभवात् ॥ २६ ॥

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ २७ ॥

शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॥ २८ ॥

अत एव च नित्यत्वम् ॥ २९ ॥

समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॥

मध्वादिष्वसंभवादनधिकारं जैमिनिः ॥ ३१ ॥

ज्योतिषि भावाच्च ॥ ३२ ॥

भावं तु बादरायणोऽस्ति हि ॥ ३३ ॥

शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॥ ३४ ॥

क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३५ ॥

संस्कारपरामर्शात्तदभावाभिलापाच्च ॥ ३६ ॥

तदभावनिर्धारणे च प्रवृत्तेः ॥ ३७ ॥

श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॥ ३८ ॥

कम्पनात् ॥ ३९ ॥

ज्योतिर्दर्शनात् ॥ ४० ॥

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥

पत्यादिशब्देभ्यः ॥ ४३ ॥

चतुर्थः पादः ॥

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥

सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥

तदधीनत्वादर्थवत् ॥ ३ ॥

ज्ञेयत्वावचनाच्च ॥ ४ ॥

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥

महद्वच्च ॥ ७ ॥

चमसवदविशेषात् ॥ ८ ॥

ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ॥ ९ ॥

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥

प्राणादयो वाक्यशेषात् ॥ १२ ॥

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥

समाकर्षात् ॥ १५ ॥

जगद्वाचित्वात् ॥ १६ ॥

जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ॥ १७ ॥

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥

वाक्यान्वयात् ॥ १९ ॥

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ २१ ॥

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥

अभिध्योपदेशाच्च ॥ २४ ॥

साक्षाच्चोभयाम्नानात् ॥ २५ ॥

आत्मकृतेः परिणामात् ॥ २६ ॥

योनिश्च हि गीयते ॥ २७ ॥

एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥

ॐ

द्वितीयोऽध्यायः ॥

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोष-
प्रसङ्गात् ॥ १ ॥

इतरेषां चानुपलब्धेः ॥ २ ॥

एतेन योगः प्रत्युक्तः ॥ ३ ॥

न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ४ ॥

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥ ५ ॥

दृश्यते तु ॥ ६ ॥

असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ ७ ॥

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ ८ ॥

न तु दृष्टान्तभावात् ॥ ९ ॥

स्वपक्षदोषाच्च ॥ १० ॥

तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्र-
सङ्गः ॥ ११ ॥

एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ १२ ॥

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ १३ ॥

तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ १४ ॥

भावे चोपलब्धेः ॥ १५ ॥

सत्त्वाच्चावरस्य ॥ १६ ॥

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॥ १७ ॥

युक्तेः शब्दान्तराच्च ॥ १८ ॥

पटवच्च ॥ १९ ॥

यथा च प्राणादिः ॥ २० ॥

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २१ ॥

अधिकं तु भेदनिर्देशात् ॥ २२ ॥

अश्मादिवच्च तदनुपपत्तिः ॥ २३ ॥

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ २४ ॥

देवादिवदपि लोके ॥ २५ ॥

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २६ ॥

श्रुतेस्तु शब्दमूलत्वात् ॥ २७ ॥

आत्मनि चैवं विचित्राश्च हि ॥ २८ ॥

स्वपक्षदोषाच्च ॥ २९ ॥

सर्वोपेता च तद्दर्शनात् ॥ ३० ॥

विकरणत्वान्नेति चेत्तदुक्तम् ॥ ३१ ॥

न प्रयोजनवत्त्वात् ॥ ३२ ॥

लोकवत्तु लीलाकैवल्यम् ॥ ३३ ॥

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति ॥ ३४ ॥

न कर्माविभागादिति चेन्नानादित्वात् ॥ ३५ ॥

उपपद्यते चाप्युपलभ्यते च ॥ ३६ ॥

सर्वधर्मोपपत्तेश्च ॥ ३७ ॥

द्वितीयः पादः ॥

रचनानुपपत्तेश्च नानुमानम् ॥ १ ॥

प्रवृत्तेश्च ॥ २ ॥

पयोम्बुवच्चेत्तत्रापि ॥ ३ ॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ ४ ॥

अन्यत्राभावाच्च न तृणादिवत् ॥ ५ ॥

अभ्युपगमेऽप्यर्थाभावात् ॥ ६ ॥

पुरुषाश्मवदिति चेत्तथापि ॥ ७ ॥

अङ्गित्वानुपपत्तेश्च ॥ ८ ॥

अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ ९ ॥

विप्रतिषेधाच्चासमञ्जसम् ॥ १० ॥

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ ११ ॥

उभयथापि न कर्मातस्तदभावः ॥ १२ ॥

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ १३ ॥

नित्यमेव च भावात् ॥ १४ ॥

रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥ १५ ॥

उभयथा च दोषात् ॥ १६ ॥

अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १७ ॥

समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ १८ ॥

इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥ १९ ॥

उत्तरोत्पादे च पूर्वनिरोधात् ॥ २० ॥

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ २१ ॥

प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥ २२ ॥

उभयथा च दोषात् ॥ २३ ॥

आकाशे चाविशेषात् ॥ २४ ॥

अनुस्मृतेश्च ॥ २५ ॥

नासतो दृष्टत्वात् ॥ २६ ॥

उदासीनानामपि चैवं सिद्धिः ॥ २७ ॥

नाभाव उपलब्धेः ॥ २८ ॥

वैधर्म्याच्च न स्वप्नादिवत् ॥ २९ ॥

न भावोऽनुपलब्धेः ॥ ३० ॥

क्षणिकत्वाच्च ॥ ३१ ॥

सर्वथानुपपत्तेश्च ॥ ३२ ॥

नैकस्मिन्नसंभवात् ॥ ३३ ॥

एवं चात्माकात्स्न्र्यम् ॥ ३४ ॥

न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ ३५ ॥

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ ३६ ॥

पत्युरसामञ्जस्यात् ॥ ३७ ॥

संबन्धानुपपत्तेश्च ॥ ३८ ॥

अधिष्ठानानुपपत्तेश्च ॥ ३९ ॥

करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥

अन्तवत्त्वमसर्वज्ञता वा ॥ ४१ ॥

उत्पत्त्यसंभवात् ॥ ४२ ॥

न च कर्तुः करणम् ॥ ४३ ॥

विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४४ ॥

विप्रतिषेधाच्च ॥ ४५ ॥

तृतीयः पादः ॥

न वियदश्रुतेः ॥ १ ॥

अस्ति तु ॥ २ ॥

गौण्यसंभवात् ॥ ३ ॥

शब्दाच्च ॥ ४ ॥

स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ५ ॥

प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥

यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥

एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥

असंभवस्तु सतोऽनुपपत्तेः ॥ ९ ॥

तेजोऽतस्तथाह्याह ॥ १० ॥

आपः ॥ ११ ॥

पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ १२ ॥

तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १३ ॥

विपर्ययेण तु क्रमोऽत उपपद्यते च ॥ १४ ॥

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥ १५ ॥

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ १६ ॥

नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥

ज्ञोऽत एव ॥ १८ ॥

उत्क्रान्तिगत्यागतीनां ॥ १९ ॥

स्वात्मना चोत्तरयोः ॥ २० ॥

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २१ ॥

स्वशब्दोन्मानाभ्यां च ॥ २२ ॥

अविरोधश्चन्दनवत् ॥ २३ ॥

अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २४ ॥

गुणाद्वा लोकवत् ॥ २५ ॥

व्यतिरेको गन्धवत् ॥ २६ ॥

तथा च दर्शयति ॥ २७ ॥

पृथगुपदेशात् ॥ २८ ॥

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ३० ॥

पुंस्त्वादिवत्तस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरानियमो वान्यथा ॥

कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥

विहारोपदेशात् ॥ ३४ ॥

उपादानात् ॥ ३५ ॥

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३६ ॥

उपलब्धिवदनियमः ॥ ३७ ॥

शक्तिविपर्ययात् ॥ ३८ ॥

समाध्यभावाच्च ॥ ३९ ॥

यथा च तक्षोभयथा ॥ ४० ॥

परात्तु तच्छ्रुतेः ॥ ४१ ॥

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४२ ॥

अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ ४३ ॥

मन्त्रवर्णाच्च ॥ ४४ ॥

अपि च स्मर्यते ॥ ४५ ॥

प्रकाशादिवन्नैवं परः ॥ ४६ ॥

स्मरन्ति च ॥ ४७ ॥

अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत् ॥ ४८ ॥

असंततेश्चाव्यतिकरः ॥ ४९ ॥

आभास एव च ॥ ५० ॥

अदृष्टानियमात् ॥ ५१ ॥

अभिसंध्यादिष्वपि चैवम् ॥ ५२ ॥

प्रदेशादिति चेन्नान्तर्भावात् ॥ ५३ ॥

चतुर्थः पादः ॥

तथा प्राणाः ॥ १ ॥

गौण्यसंभवात् ॥ २ ॥

तत्प्राक्श्रुतेश्च ॥ ३ ॥

तत्पूर्वकत्वाद्वाचः ॥ ४ ॥

सप्त गतेर्विशेषितत्वाच्च ॥ ५ ॥

हस्तादयस्तु स्थितेऽतो नैवम् ॥ ६ ॥

अणवश्च ॥ ७ ॥

श्रेष्ठश्च ॥ ८ ॥

न वायुक्रिये पृथगुपदेशात् ॥ ९ ॥

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ १० ॥

अकरणत्वाच्च न दोषस्तथाहि दर्शयति ॥ ११ ॥

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ १२ ॥

अणुश्च ॥ १३ ॥

ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ १४ ॥

प्राणवता शब्दात् ॥ १५ ॥

तस्य च नित्यत्वात् ॥ १६ ॥

त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥

भेदश्रुतेः ॥ १८ ॥

वैलक्षण्याच्च ॥ १९ ॥

संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ २० ॥

मांसादि भौमं यथाशब्दमितरयोश्च ॥ २१ ॥

वैशेष्यात्तु तद्वादस्तद्वादः ॥ २२ ॥

ॐ

तृतीयोऽध्यायः ॥

तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥

त्र्यात्मकत्वात्तु भूयस्त्वात् ॥ २ ॥

प्राणगतेश्च ॥ ३ ॥

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥

भाक्तं वानात्मवित्त्वात्तथाहि दर्शयति ॥ ७ ॥

कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥

चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥

आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥

सुकृतदुष्कृते एवेति तु बादरिः ॥ ११ ॥

अनिष्टादिकारिणामपि च श्रुतम् ॥ १२ ॥

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥१३॥

स्मरन्ति च ॥ १४ ॥

अपि च सप्त ॥ १५ ॥

तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥

विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥

न तृतीये तथोपलब्धेः ॥ १८ ॥

स्मर्यतेऽपि च लोके ॥ १९ ॥

दर्शनाच्च ॥ २० ॥

तृतीयशब्दावरोधः संशोकजस्य ॥ २१ ॥

तत्साभाव्यापत्तिरुपपत्तेः ॥ २२ ॥

नातिचिरेण विशेषात् ॥ २३ ॥

अन्याधिष्ठितेषु पूर्ववदभिलापात् ॥ २४ ॥

अशुद्धमिति चेन्न शब्दात् ॥ २५ ॥

रेतःसिग्योगोऽथ ॥ २६ ॥

योनेः शरीरम् ॥ २७ ॥

द्वितीयः पादः ॥

संध्ये सृष्टिराह हि ॥ १ ॥

निर्मातारं चैके पुत्रादयश्च ॥ २ ॥

मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥

पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ५ ॥

देहयोगाद्वा सोऽपि ॥ ६ ॥

तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥

अतः प्रबोधोऽस्मात् ॥ ८ ॥

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥

मुग्धेऽर्धसंपत्तिः परिशेषात् ॥ १० ॥

न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥

न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥

अपि चैवमेके ॥ १३ ॥

अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥

प्रकाशवच्चावैयर्थ्यम् ॥ १५ ॥

आह च तन्मात्रम् ॥ १६ ॥

दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥

अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥

अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ २० ॥

दर्शनाच्च ॥ २१ ॥

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥

तदव्यक्तमाह हि ॥ २३ ॥

अपि च संराधने प्रत्यक्षानुमानाभ्याम् ॥ २४ ॥

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २५ ॥

अतोऽनन्तेन तथाहि लिङ्गम् ॥ २६ ॥

उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २७ ॥

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥

पूर्ववद्वा ॥ २९ ॥

प्रतिषेधाच्च ॥ ३० ॥

परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॥ ३१ ॥

सामान्यात्तु ॥ ३२ ॥

बुद्ध्यर्थः पादवत् ॥ ३३ ॥

स्थानविशेषात्प्रकाशादिवत् ॥ ३४ ॥

उपपत्तेश्च ॥ ३५ ॥

तथान्यप्रतिषेधात् ॥ ३६ ॥

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥

फलमत उपपत्तेः ॥ ३८ ॥

श्रुतत्वाच्च ॥ ३९ ॥

धर्मं जैमिनिरत एव ॥ ४० ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥

तृतीयः पादः ॥

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥

भेदान्नेति चेन्नैकस्यामपि ॥ २ ॥

स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

दर्शयति च ॥ ४ ॥

उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥ ५ ॥

अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥

न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥ ७ ॥

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ८ ॥

व्याप्तेश्च समञ्जसम् ॥ ९ ॥

सर्वाभेदादन्यत्रेमे ॥ १० ॥

आनन्दादयः प्रधानस्य ॥ ११ ॥

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

इतरे त्वर्थसामान्यात् ॥ १३ ॥

आध्यानाय प्रयोजनाभावात् ॥ १४ ॥

आत्मशब्दाच्च ॥ १५ ॥

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥

अन्वयादिति चेत्स्यादवधारणात् ॥ १७ ॥

कार्याख्यानादपूर्वम् ॥ १८ ॥

समान एवं चाभेदात् ॥ १९ ॥

संबन्धादेवमन्यत्रापि ॥ २० ॥

न वा विशेषात् ॥ २१ ॥

दर्शयति च ॥ २२ ॥

संभृतिद्युव्याप्त्यपि चातः ॥ २३ ॥

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥

वेधाद्यर्थभेदात् ॥ २५ ॥

हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥

सांपराये तर्तव्याभावात्तथा ह्यन्ये ॥ २७ ॥

छन्दत उभयाविरोधात् ॥ २८ ॥

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ २९ ॥

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥

अनियमः सर्वेषामविरोधः शब्दानुमानाभ्याम् ॥ ३१ ॥

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥

इयदामननात् ॥ ३४ ॥

अन्तरा भूतग्रामवत्स्वात्मनः ॥ ३५ ॥

अन्यथाभेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥ ३६ ॥

व्यतिहारो विंशिषन्ति हीतरवत् ॥ ३७ ॥

सैव हि सत्यादयः ॥ ३८ ॥

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥

आदरादलोपः ॥ ४० ॥

उपस्थितेऽतस्तद्वचनात् ॥ ४१ ॥

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥

प्रदानवदेव तदुक्तम् ॥ ४३ ॥

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥

पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत् ॥ ४५ ॥

अतिदेशाच्च ॥ ४६ ॥

विद्यैव तु निर्धारणात् ॥ ४७ ॥

दर्शनाच्च ॥ ४८ ॥

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ॥ ५० ॥

न सामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः ॥ ५१ ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥ ५२ ॥

एक आत्मनः शरीरे भावात् ॥ ५३ ॥

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥

मन्त्रादिवद्वा विरोधः ॥ ५६ ॥

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ५७ ॥

नाना शब्दादिभेदात् ॥ ५८ ॥

विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥६०॥

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥

शिष्टेश्च ॥ ६२ ॥

समाहारात् ॥ ६३ ॥

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥

दर्शनाच्च ॥ ६६ ॥

चतुर्थः पादः ॥

पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥

शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥

आचारदर्शनात् ॥ ३ ॥

तच्छ्रुतेः ॥ ४ ॥

समन्वारम्भणात् ॥ ५ ॥

तद्वतो विधानात् ॥ ६ ॥

नियमाच्च ॥ ७ ॥

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥

तुल्यं तु दर्शनम् ॥ ९ ॥

असार्वत्रिकी ॥ १० ॥

विभागः शतवत् ॥ ११ ॥

अध्ययनमात्रवतः ॥ १२ ॥

नाविशेषात् ॥ १३ ॥

स्तुतयेऽनुमतिर्वा ॥ १४ ॥

कामकारेण चैके ॥ १५ ॥

उपमर्दं च ॥ १६ ॥

ऊर्ध्वरेतःसु च शब्दे हि ॥ १७ ॥

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

विधिर्वा धारणवत् ॥ २० ॥

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

भावशब्दाच्च ॥ २२ ॥

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥

तथा चैकवाक्यतोपबन्धात् ॥ २४ ॥

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामव-
श्यानुष्ठेयत्वात् ॥ २७ ॥

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥

अबाधाच्च ॥ २९ ॥

अपि च स्मर्यते ॥ ३० ॥

शब्दश्चातोऽकामकारे ॥ ३१ ॥

विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥

सहकारित्वेन च ॥ ३३ ॥

सर्वथापि त एवोभयलिङ्गात् ॥ ३४ ॥

अनभिभवं च दर्शयति ॥ ३५ ॥

अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥

अपि च स्मर्यते ॥ ३७ ॥

विशेषानुग्रहश्च ॥ ३८ ॥

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥

न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ ४१ ॥

उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥ ४२ ॥

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४३ ॥

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ ४५ ॥

श्रुतेश्च ॥ ४६ ॥

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४८ ॥

मौनवदितरेषामप्युपदेशात् ॥ ४९ ॥

अनाविष्कुर्वन्नन्वयात् ॥ ५० ॥

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५१ ॥

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥



ॐ

चतुर्थोऽध्यायः ॥

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

लिङ्गाच्च ॥ २ ॥

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

न प्रतीके न हि सः ॥ ४ ॥

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

आसीनः संभवात् ॥ ७ ॥

ध्यानाच्च ॥ ८ ॥

अचलत्वं चापेक्ष्य ॥ ९ ॥

स्मरन्ति च ॥ १० ॥

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

आ प्रायणात्तत्रापि हि दृष्टम् ॥ १२ ॥

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥

यदेव विद्ययेति हि ॥ १८ ॥

भोगेन त्वितरे क्षपयित्वा संपद्यते ॥ १९ ॥

द्वितीयः पादः ॥

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

अत एव च सर्वाण्यनु ॥ २ ॥

तन्मनः प्राण उत्तरात् ॥ ३ ॥

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

भूतेषु तच्छ्रुतेः ॥ ५ ॥

नैकस्मिन्दर्शयतो हि ॥ ६ ॥

समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

नोपमर्देनातः ॥ १० ॥

अस्यैव चोपपत्तेरेष ऊष्मा ॥ ११ ॥

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥

स्पष्टो ह्येकेषाम् ॥ १३ ॥

स्मर्यते च ॥ १४ ॥

तानि परे तथा ह्याह ॥ १५ ॥

अविभागो वचनात् ॥ १६ ॥

तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १७ ॥

रश्म्यनुसारी ॥ १८ ॥

निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥

अतश्चायनेऽपि दक्षिणे ॥ २० ॥

योगिनः प्रति च स्मर्यते स्मार्ते चैते ॥ २१ ॥

तृतीयः पादः ॥

अर्चिरादिना तत्प्रथितेः ॥ १ ॥

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

तडितोऽधि वरुणः संबन्धात् ॥ ३ ॥

आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥

उभयव्यामोहात्तत्सिद्धेः ॥ ५ ॥

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ६ ॥

514 कार्यं बादरिरस्य गत्युपपत्तेः ॥ ७ ॥

515 विशेषितत्त्वाच्च ॥ ८ ॥

516 सामीप्यात्तु तद्व्यपदेशः ॥ ९ ॥

517 कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ १० ॥

518 स्मृतेश्च ॥ ११ ॥

519 परं जैमिनिर्मुख्यत्वात् ॥ १२ ॥

520 दर्शनाच्च ॥ १३ ॥

521 न च कार्ये प्रतिपत्त्यभिसंधिः ॥ १४ ॥

522 अप्रतीकालम्बनान्नयतीति बादरायण उभयथादोषा-
त्तत्क्रतुश्च ॥ १५ ॥

523 विशेषं च दर्शयति ॥ १६ ॥

चतुर्थः पादः ॥

524 संपद्याविर्भावः स्वेनशब्दात् ॥ १ ॥

525 मुक्तः प्रतिज्ञानात् ॥ २ ॥

526 आत्मा प्रकरणात् ॥ ३ ॥

527 अविभागेन दृष्टत्वात् ॥ ४ ॥

528 ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

529 चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

संकल्पादेव तु तच्छ्रुतेः ॥ ८ ॥

अत एव चानन्याधिपतिः ॥ ९ ॥

अभावं बादरिराह ह्येवम् ॥ १० ॥

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥

तन्वभावे संध्यवदुपपत्तेः ॥ १३ ॥

भावे जाग्रद्वत् ॥ १४ ॥

प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥

स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥

जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च ॥ १७ ॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥१८॥

विकारावर्ति च तथा हि स्थितिमाह ॥ १९ ॥

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

इति चतुर्थोऽध्यायः ॥

ब्रह्मसूत्राणि संपूर्णानि ॥